National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(18): 93-96
© 2018 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# श्रीदेवीभागवते नवरात्रिपूजाविधानम्

**आचार्यः जि. पद्मनाभम्**

**सारांशः –** अस्मिन् लेखे श्रीमद्देवीभागवतपुराणस्य आधारोपरि नवरात्रिपूजायाः, देवीयज्ञस्य तथा च कुमारीपूजायाः विस्तृतं वर्णनं विद्यते। अस्य मुख्याः अंशाः इत्थं सन्तिः

- पूजा-व्रतयोः परिभाषाः पूज् धातोः 'पूजा' (बाह्योपकरणैः अर्चनम्) तथा वृञ् धातोः 'व्रतम्' (नियमपूर्वकम् अन्नादिवर्जनम्) इति शब्दयोः व्युत्पत्तिपुरस्सरं व्याख्या कृता अस्ति।
- श्रीदेवीयज्ञविधानम्: महर्षिः व्यासः राजा जनमेजयाय देवीयज्ञस्य महिमानं श्रावयति। भगवता विष्णुना अपि आदिशक्तेः आराधनाय विशालः यज्ञः कृतः, यत्र सप्तविंशति ऋत्विजः आसन्। तत्र आकाशवाण्या विष्णोः सर्वेश्वरत्वं देव्यनुग्रहेणैव सिद्धमिति घोषितम्।
- नवरात्रिव्रतविधिः: चैत्र-आश्विनमासयोः (वसन्ते शरदि च) नवरात्रिपूजायाः विशेषमहत्त्वं वर्तते। अमावास्यायां दीक्षां स्वीकृत्य प्रतिपत्तिथौ कलशस्थापना, भगवत्याः मूर्तिस्थापनं (अथवा यन्त्रस्थापनम्), तथा च देवीभागवतपरायणं/सप्तशतीपाठः करणीयः।
- कुमारीपूजाः नवरात्रौ द्विवर्षादारभ्य दशवर्षपर्यन्ताः कन्याः कुमारिका-त्रिमूर्ति-कल्याणी-रोहिणी-कालिका-चण्डिका-शाम्भवी-दुर्गा-सुभद्रा इति नामभिः पूजनीयाः। एतेन दारिद्र्यनाशः, विजयः, ऐश्वर्यप्राप्तिश्च भवति।
- नैवेद्यविधानम्: विभिन्नतिथौ, नक्षत्रेषु, योगेषु च देव्यै प्रियाणि नैवेद्यानि (यथा- गुड, मधु, घृत, पायसादीनि) प्रदेयानि। विशेषतः मधूकवृक्षस्य पूजायाः वर्णनमपि अत्र प्राप्यते।

**कूटशब्दाः –** अन्वर्थनाम, यमदंष्ट्रिका, वाग्बीजमहिमा, ऋत्विजः, नवार्णमन्त्रः, नक्तव्रतम्, कुमारीपूजा, विष्कम्भादियोगः, मधूकवृक्षः, त्रिरात्रविधानम् ।

**पूजाशब्दनिर्वचनम् - पूज्-पूजायाम्** इत्यस्माद् धातोः निष्पन्नस्य **पूजा**शब्दस्य पूजनमित्यर्थः; अर्थात् कर-चरणादिभिः बाह्योपकरणैश्च क्रियमाणः कार्यविशेषः । **वृती-वर्जने** (किंवा **व्रत-नियमने**) इत्यस्माद् धातोः निष्पन्नस्य **व्रत**शब्दस्य अन्नादिपदार्थवर्जनमित्यर्थः । 'व्रत्यते अन्नादिकम् अनेनेति व्रतम्' इति तत्र व्युत्पत्तिः। **दीक्षा** इत्युक्ते नियमस्वीकरणमित्यर्थे प्रसिद्धैव। यज-देवपूजासङ्गतिकरणदानेषु इत्यस्माद्धातोः निष्पन्नस्य यज्ञशब्दस्यापि पूजनमित्यर्थः, यजते इति यज्ञः इत्यन्वर्थं नाम ।

एवं पूजाविषये तत्तत्सन्दर्भानुसारेण नियमभेदेन यद्यपि व्रतादिशब्दाः भिद्यन्ते तथापि सर्वत्र पूजनम् अथवा सेवनं समानमस्ति । यथा पूजादयो भक्त्या फलार्थं क्रियन्ते तद्वदेव तीर्थसेवनमपि। अपि च केषुचित् व्रतेषु तीर्थसेवनमप्यन्तर्भवतीति कृत्वा तत्तत् पूजाव्रत-तीर्थादिविषयाः यथामति प्रतिपाद्यन्ते ।

**श्रीदेवीयज्ञविधानम्**

सत्यव्रतस्य चरितं देव्याः वाग्बीजमहिमानञ्च जनमेजयाय श्रावयित्वा श्रीव्यासमहर्षिः तदनन्तरं सा आदिशक्तिरेव सर्वजगत्कारणमिति, सा सर्वैः भक्त्या क्रियमाणाः सेवाः स्वीकरोतीति, अतो देवीयज्ञं करोत्विति, सा सर्वकामितार्थान् प्रददातीत्यवोचत्। तदा जनमेजयः श्रीमहादेव्याः यागाय पूजाविधिः कीदृशः? के च मन्त्राः पठितव्याः? कानि च द्रव्याण्यावश्यकानि? कति विप्रास्समाहूतव्याः?

कियद्दक्षिणा देया? तत्सर्वं सविस्तरं प्रवदत्वित्येवमपृच्छत्। तदा व्यासो देवीयज्ञविधमेवमवोचत्।[1]

ब्रह्मविष्णुमहेश्वराः सृष्टिकार्यमारभ्य स्वस्थानेषु यथेष्टं सुखम्नासन् । महालक्ष्मीसमेत-श्रीहरिरेकदा सुधासागरमध्यस्थां मणिद्वीपवासिनीं समस्मरत्। पूर्व तत्सागरमध्ये एव महा-मायादर्शनमवाप्य तस्याः मायाप्रभावेण स्त्रीत्वं प्राप्य तस्याः दयया शुभमन्त्रश्वासादितवान् । तादृशो रमारमणः श्रीदेवीयागं कर्तुं सङ्कल्प्य कैलासं गत्वा शङ्करं, सत्यलोके ब्रह्माणम्, इन्द्राद्यष्टदिक्पालकान्, कोटित्रयदेवान्, ऋषिगणान् च समाहूतवान्। ते सर्वे यागसम्भारान् महाविभवसम्भरितान् कल्पयामासुः। अनन्तरं देवशिल्पिभिः विशालो मण्टपो निर्मितः। सप्तविंशतिसंख्याकाः ऋत्विजः तस्मिन् यज्ञे वृताः। ब्राह्मणाः सुविशालं यज्ञवेदिकां परिकल्प्य वेदिकायाम् अग्निं प्रतिष्ठाप्य श्रीदेवीबीजसम्भरितैः देवीमन्त्रैः होमं चक्रुः । एवं विधिविधानैः होमे कृते आकाशवाणी एवमवदत् -

**विष्णो त्वं भव देवानां हरे ! श्रेष्ठतमस्सदा ।**
**मान्यश्च पूजनीयश्च समर्थश्च सुरेष्वपि।।**
**सर्वे त्वामर्चयिष्यन्ति ब्रह्माद्याश्च सवासवाः ।।**
**प्रभविष्यन्ति भो भक्त्या मानवा भुवि सर्वतः ।**
**रदस्त्वञ्च सर्वेषां भविता मानवेषु वै ।।**
**कामदस्सर्व देवानां परमः परमेश्वरः ।**
**सर्वयज्ञेषु मुख्यस्त्वं पूज्यः सर्वैश्च याज्ञिकैः ।।**
**त्वां जनाः पूजयिष्यन्ति वरदस्त्वं भविष्यसि ।**
**श्रमिष्यन्ति च देवास्त्वां दानवैरतिपीडिताः ।।**[2] इति ।

हे विष्णोः तव दीक्षया सन्तुष्टास्मि। त्वं देवोत्तमः। सुरसमाजे मान्यः, पूज्यः, समर्थश्च भविष्यसि । इन्द्रादयः ब्रह्मा च सर्वे त्वां समर्थयन्ति । भुवि सर्वत्र तव भक्ताः समुद्भवन्ति । तेभ्यः त्वं वरदो भूत्वा प्रकाशसे । त्वमेव यज्ञाधिपतिः, धर्मरक्षकश्च इत्येवमशरीरवाणी वराणि दत्वा विरराम। श्रीहरिः यज्ञं समाप्य लक्ष्मीसहितो गरुडवाहनारूढो वैकुण्ठं गत्वा जगज्जननीमेव संस्मरन् पालनकार्यनिमग्नोऽभवत् । मुनिपुङ्गवाः देवाः ब्रह्मादयो देवीध्यानतत्पराः नैक शुभानि प्रापुः।

**श्रीदुर्गादेव्याः प्रतिष्ठा**

श्रीदेवीवरप्रसादेन कण्टकरहितं राज्यमवाप्य सुदर्शनो मन्त्रिणो दैवज्ञांश्च समाहूय शुभमुहूर्त प्रवदन्त्विति पृष्ट्वा हेमसिंहासनमेकं कारयित्वा तत्र देवीं स्थापयितुं, सर्वे तां देवीं नित्यम् आराधयितुं च कथितम्। पूर्वं यथा श्रीरामचन्द्रो धर्मार्थकाममोक्षदायिनीं भगवतीं सिंहासने समुपस्थापितवान् तद्वत् अहमपि राज्यं पालयामि। देवी शिवा शक्तिदा सा जगदम्बिका नागरजनैस्सर्वैः भक्त्या पूजनीया भवतीत्यवदत् ।[3]

तदा मन्त्रिणः राजशासनमनुसृत्य शुभमुहूर्तमेकमसूचयन्। शिल्पिवराः सुन्दरदेवीमन्दिर-मेकमकल्पयन्। सुदर्शनः चैतन्यवन्तं विग्रहमेकमकारयत्। वेदविदः ब्राह्मणान् समाहूय शुभे मुहूर्ते श्रीदेवीं प्रतिष्ठापयामास। सः मतिमान् यथाविधि देवीयागमकरोत्, सुरानपूजयत्। एवं। एवं श्रीदेव्याः प्रतिष्ठामहोत्सवः विप्राणां वेदघोषैः, दिव्यगानैः, वाद्यनिस्वनैश्च सुमनोहरोऽऽसीत्।

**श्रीदेवीनवरात्रिपूजाविधिः**

हे द्विजोत्तम! नवरात्रिषु विशिष्य शरन्नवरात्रिषु विधिविधानेन आचरणीयं किमस्ति ? देवीवराज्याचरणविधिः कः ? तत्फलं किमिति जनमेजयेन पृष्ठः श्रीव्यासमहर्षिः देवीनव-विन्रतं कथं विधिपूर्वक कार्यमित्येवमवदत् ।

चैत्रमासे शरत्काले विशिष्य नवरात्रोत्सवः करणीयः। चैत्रे वसन्तनवरात्राणीति, आश्वयुजि शुद्धप्रतिपदारभ्य नवमीपर्यन्तम् उत्सवाः क्रियन्ते। दशमी विजयदशमीति प्रसिद्धि ता। शरद्वसन्तयोः यमदष्टिके इति ख्यातिः । अतः विधिविधानैः अवश्यं चण्डिका पूजनीया। ऋतुद्वयप्रवेशनात्पूर्वम् अमावास्याम् एकवारं भुक्त्वा सम्भारान् सम्प्राप्य मण्डपः निर्माणं करणीयम्। तन्मध्ये शुभ्रा स्थिरा च वेदिका कल्पनीया।

**चतुर्हस्ता च हस्तोच्छ्रा पीठार्थं स्थानमुत्तमम् ।**
**तोरणानि विचित्राणि वितानञ्च प्रकल्पयेत् ।।**[4]

अमावास्यां रात्रावेव ऋत्विजः नियम्य प्रतिपदि शुभोदये वेदविद्भिः ऋत्विजैस्सह नित्यकृत्यानि समाप्य तान् यथाविधि सम्पूज्य वस्त्रादिकान् प्रदाय तत्तत्कार्येषु नियोजयेत्। ते तृप्ता भवन्ति चेत् सर्वाण्यपि कार्याणि निर्विघ्नानि भवन्ति। विप्रसाहायेन स्वस्तिवाचनं परि-समाप्य वेदिकायां विध्युक्तं शास्त्रविधिमनुसृत्य सायुधं चतुर्बाहुयुतां वा अथवा अष्टभुजयुतां वा देवीं स्थापयेत्। यदि विग्रहे न लभ्यते तर्हि नवार्णमन्त्रसंयुतं यन्त्रं स्थापयेत् ।

नित्यं नववारं वा, पञ्चवारं वा, त्रिवारमथवा न्यूनातिन्यूनमेकवारं वा सप्तशतिपारायणं करणीयम् । देवीभागवतं पठनं नवरात्रिषु समापनीयम्। सहस्रनामादिकैः त्रिकालपूजादिभिश्च नवरात्रिषु देवीं समर्चयेत्। आरम्भदिने एव देवीं ध्यात्वा नियमः कार्यः। उपवासेन वा अथवा नक्ते एकभुक्तेन वा स्थातव्य इति। जगदम्बे! तव व्रतं करिष्यामि, साहाय्यं कुरु इति सम्प्रार्थ्यत।

सर्वोपचारैः भक्तितत्परत्वेन देवीं समर्चयन् पारायणं कुर्वन् यथाशक्ति ब्राह्मणभोजनं प्रकल्प्यनेन व्रतस्य पूर्णफलमवाप्नुयात्। बलिदानादिकं विधिनिषेधौ ज्ञात्वा करणीयम्।

**मासाशनं ये कुर्वन्ति तैः कार्य पशुहिंसनम् ।**
**महिषाजवराहाणां बलिदानं विशिष्यते ।।**
**देव्यग्रे निहता यान्ति पशवः स्वर्गमव्ययम् ।**
**न हिंसा पशुजा तत्र निघ्नतां तत्कृते ऽनघ ।।**
**अहिंसा याज्ञिकी प्रोक्ता सर्वशास्त्रविनिर्णये।**
**देवतार्थे विसृष्टानां पशूनां स्वगतिध्रुवा ।।**[5]

होमविधये कुण्डं परिकल्प्य होमानन्तरं व्रतं परिसमाप्य पूर्णाहुति दद्यात्। नवरात्रिषु नित्यं त्रिकालेषु पूजां कृत्वा नृत्तगीतवाद्यैः यथाविभवमुत्सवं कृत्वा भूमावेव शयनं कुर्यात् । अमृतोपमं भोजनं दत्वा कुमारीपूजां कुर्यात्। श्रीदेव्याः कुमारी नवयौवना इति नामान्तरभावेन च कुमारीपूजां कारयेत्। अथवा नित्यम् एकां कुमारी नवसंख्याकं कुमारीगणं वा वस्त्राद्य-लङ्कारान् भोजनं च दत्वा पूजयेत्। देवीस्वरूपं सर्वदा शुभचित्तेन भाव्यं, पूजनीयवयो-विशेषनामभेदाः शास्त्रे एवं वर्तन्ते -

**एकवर्षा न कर्तव्या कन्या पूजाविधौ नृप।**
**परमज्ञातु भोगानां गन्धादीनां बालिका ।।**
गन्धादिभोगज्ञानराहित्यात् एकवर्षात्मिका बालिका पूजार्थं न ग्राह्या।
द्विवर्षात्मिका प्रभृति दशवर्षात्मिकापर्यन्तं पूजार्थ ग्रहीतुं शक्यते -
**कुमारिका तु सा प्रोक्ता द्विवर्षा या भवेदिह।**
**त्रिमूर्तिश्च त्रिवर्षा च कल्याणि चतुरब्दिका ।।**
**रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ।**
**चण्डिका सप्तवर्षास्यादष्टवर्षा च शाम्भवी ।।**
**नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी।।**
**अत ऊर्ध्वं न कर्तव्या सर्वकार्यविनिर्गता ।।**
**एतैः नवनामभिः देवीं यथाविधि पूजयेत्।**[6]
एतेषां नवविधपूजानां फलं प्रवदामि, श्रद्धया श्रुणु -
**कुमारी पूजिता कुर्याद्दुःखदारिद्र्यनाशनम् ।**
**शत्रुक्षयं धनायुष्यं बलवृद्धिं करोति वै ।।**
**त्रिमूर्तिपूजनादायुः त्रिवर्गस्य फलं लभेत्।**
**धनधान्यागमश्चैव पुत्रपौत्रादिवृद्धयः ।।**
**विद्यार्थी विजयार्थी च राज्यार्थी यश्च पार्थिवः ।**
**सुखार्थी पूजयेन्नित्यं कल्याणीं सर्वकामदाम् ।।**
**कालिकां शत्रुनाशार्थं पूजयेद्भक्तिपूर्वकम् ।**
**ऐश्वर्यधनकामश्च चण्डिकां परिपूजयेत् ।।**
**पूजयेच्छाम्भवीं नित्यं नृपसम्मोहनाय च ।**
**दुःखदारिद्र्यनाशाय सङ्ग्रामे विजयाय च ।।**
**क्रूरशत्रुविनाशार्थं तथोग्रकर्मसाधने।**
**दुर्गा च पूजयेद्भक्त्या परलोकसुखाय च ॥**
**वाञ्छितार्थस्य सिद्ध्यर्थं सुभद्रां पूजयेत्सदा।**
**रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ।।**[7]
श्रीरस्तु इति मन्त्रेण, श्रीयुक्तमन्त्रेण, बीजमन्त्रेण वा नरः भक्त्या देवीं पूजयेत् ।
**सत्वादिभिस्त्रीमूर्तिर्यातैर्हि नानास्वरूपिणी।**
**त्रिकालव्यापिनी शक्तिस्त्रीमूर्ति पूजयाम्यहम् ।।**
**कल्याणकारिणी नित्यं भक्तानां पूजिताऽनिशम् ।**
**पूजयामि च तां भक्त्या कल्याणीं सर्वकामदाम् ।।**
**रोहयन्ती च बीजानि प्राग्जन्मसञ्चितानि वै।**
**या देवी सर्वभूतानां रोहिणीं पूजयाम्यहम् ।।**
**काली कालयते सर्वं ब्रह्माण्डं सचराचरम्।**
**कल्पान्तसमये ये तां कालिकां पूजयाम्यहम् ।।**
**चण्डिकां चण्डरूपां च चण्डमुण्डविनाशिनीम् ।**
**कल्पान्तसमये या तां कालिकां पूजयाम्यहम् ।।**
**चण्डिकां चण्डरूपां च चण्डमुण्डविनाशिनीम् ।**
**तां चण्डपापहारिणीं चण्डिकां पूजयाम्यहम् ।।**
**अकारणात्समुत्पत्तिर्यन्मयैः परिकीर्तिता ।**
**यस्यास्तां सुखदां देवीं शाम्भवीं पूजयाम्यहम् ।।**
**दुर्गा त्रायति भक्तं या सदा दुर्गार्तिनाशिनी।।**
**दुर्ज्ञेया सर्वदेवानां तां दुर्गा पूजयाम्यहम् ।।**
**सुभद्राणि च भक्तानां कुरुते पूजिता सदा।**
**अभद्रनाशिनीं देवीं सुभद्रां पूजयाम्यहम् ।।**[8]
इत्येवं वस्त्रालङ्कारसुगन्धद्रव्यादिभिः नैकमन्त्रैश्च कन्यकाः सदा पूजनीयाः भवन्ति ।

रोगरहिता सर्वाङ्गसुन्दरी कन्या तत्तद्फलेभ्यः पूजनीयास्ति। ब्राह्मणकुमारी सर्वकार्यार्थे, विजयार्थं क्षत्रियकुलोद्भवा कुमारी, लाभाय वैश्यबाला शूद्रबाला वा सेवनीयास्ति। नव-दिनानि यावत् पूजयितुं शक्तिहीनाः भवन्ति चेत् अष्टम्यां तु अवश्यं पूजयेयुः। पूर्वयुगे भद्रकाली अष्टम्यामेव दक्षयज्ञविनाशाय नैकयोगिनीभिस्सहाविर्भूता। अतोऽष्टम्यां कुमारी पूजयित्वा नानाविधोपहारैः दुर्गासेवनेन सर्वकाम्यसिद्धिर्भवति। नवरात्रनियमपालनाय यद्यशक्तता विद्यते तर्हि सप्तमी-अष्टमी-नवमीषु त्रिरात्रविधानेन पूजाकरणेनापि पूर्णफलमायाति। पूर्वजन्मनि ये व्रतमिदं न कृतवन्तः ते रोगग्रस्ताः, दरिद्राश्च भवन्ति। रक्तचन्दनयुत बिल्वपल्लवैः ये देवीमर्चयन्ति ते नृपालत्वेन भुवि जायन्ते। शिवां, सनातनीं, दुःखनाशनीं जगदम्बिकां ये न पूजयन्ति ते दरिद्राः, रोगग्रस्ताः, दुःखभागिनश्च भवन्तीत्यत्र न सन्देहो विद्यते। महापातकश्चापि नरो नवरात्रिव्रतदीक्षितो भूत्वा दुर्गा समर्चयति चेत् सर्वपापविमुक्तो भूत्वा पुरुषार्थानवाप्य सुखी भवतीति कथने नास्त्यत्र संशीतिलेशः।[9]

श्रीदेव्याराधना तत्फलितञ्च

हे भगवन्! श्रीदेव्याराधनपरो धर्मः कीदृशः? केन प्रकारेण समाराधिता श्रीदेवी तस्याः वामपदं प्रददाति? मातुः तस्याः सेवनविधिः कः? केन देवी समाराध्यते? कया रीत्या देवी नारायणमहर्षिः नारदाय सविवरमेवमवोचत् । प्राणिनः भीकरनरककूपेभ्यः त्रायते? के पदार्थाः देव्याः प्रीतिकरा? इत्येवं नारदेन सम्पृष्टः देवर्षि विप्रवर्यः सावधानतया श्रुणु। घोरमृत्युसंसारोऽयमनादिः अतो देवी संसेवनीया। प्रतिपत्प्रभृति पूर्णिमा पर्यन्तं देवीं सम्पूज्य क्रमेण तत्तत्तिथिषु विप्रेभ्यः शर्करा दुग्ध-अधूप-स्म्भाफल-मधु-गुड-नारिकेल-लाज-तिल-दधि-पृथुक-चणक-सतुः-पायसानां प्रदानेन सर्वदोषविनिर्मुक्तो भवति। अनेकानि शुभफलितानि प्राप्यन्ते। श्रीदेव्याः प्रीत्यै एभिः वस्तुभिः होमः क्रियते चेत् नराः अपि च देव्याः प्रीत्यर्थं रव्यादि सप्तवासरेषु क्रमेण पायस दुग्ध-रम्भाफल-नवीत-नैवेद्यानि एवं प्रयेदानि वर्तन्ते -शर्करा (गुरुशुक्रवासरयोः) धेनुघृतानि नैवेद्यरूपेण समर्पणीयानि। किञ्च सप्तविंशतिनक्षत्रेषु,
**सप्तविंशतिनक्षत्रनैवेद्यं श्रूयतां मुने ।।**
**घृतं तिलं शर्करां त दधिदुग्धं किलाटकम्।**
**दधि कूर्चीं मोदकं च फेणिकां घृतमण्डकम् ।।**
**कंसारं वटपत्रं च घृतपूरमतः परम् ।**
**वटकं कोकरसकं पूरणं मधुसूरणम् ।।**
**गुडं पृथुकद्राक्षे च खर्जूरं चैव चारकम्।**
**अपूपं नवनीतं च मुद्गं मोदक एव च ।।**
**मातुलिङ्गमिति प्रोक्तं भनैवेद्यं च नारद ।।**
**एवमेव विष्कम्भादिष्वपि नैवेद्यानि प्रदेयानि। यथा**
**विष्कम्भादिषि योगेषु प्रवक्ष्यामि निवेदनम् ।।**
**पदार्थानां कृतेष्वेषु प्रीणाति जगदम्बिका।**
**गुडं मधु घृतं दुग्धं दधि तक्रं त्वपूपकम् ।। ।।**
**नवनीतं कर्कटीं च कूष्माण्डं चापि मोदकम् ।**
**प्रसनं कदलं जम्बु फलमाम्रफलं तिलम् ।। ।।**
**नारङ्ग दाडिमं चैव बदरीफलमेव च।**
**धात्रीफलं पायसं च पृथुकं चणकं तथा ।।**

**नारिकेलं जम्भफलं कसेरुं सूरणं तथा।**
**एतानि क्रमशो विप्र नैवेद्यानि शुभानि च ।।**
**विष्कम्भादिषु योगेषु निर्णीतानि मनीषिभिः ।**
**अथ नैवेद्यमाख्यास्ये कारणानां पृथङ्गने ।।**
**कंसारं मण्डकं फेणी मोदकं वटपत्रकम् ।**
**लड्डुकं घृतपूर्व च तिलं दधि घृतं मधु ।।**
**करणानामिदं प्रोक्तं देवी नैवेद्यमादरात् ।**
**अधुना देव्या अत्यन्तप्रीतिकरं श्रीदेवी**
**पूजादिकविधानं कथयामि श्रद्धया श्रुणु।**[10]

नरोऽवश्यं चैत्रशुद्धतृतीयातिथौ मधूकवृक्षं पूजयेत्। **पञ्चभोज्यपदार्थयुतं नैवेद्यं समर्पयेत्।** एवं द्वादशमासेषु शुक्लपक्षतृतीयातिथौ देवीं सम्पूज्य यथाविधि नैवेद्यं दद्यात् -

**शुक्लपक्षे विधानेन नैवेद्यमभिदद्महे।**
**वैशाखमासे नैवेद्यं गुडमुक्तं च नारद ।।**
**ज्येष्ठमासे मधुप्रोक्तं देवी प्रीत्यर्थमेव तु ।**
**आषाढे नवनीतं च मधुकस्य निवेदनम् ।।**
**श्रावणे दधि नैवेद्यं भाद्रमासे च शर्करा।**
**अश्विने पायसं प्रोक्तं कार्तिकेपय उत्तमम् ।।**
**मार्गे फेण्युत्तमा प्रोक्ता पौषे च दधिकूर्चिका।**
**माघे मासि च नैवेद्यं घृतं गव्यं समाहरेत् ।।**
**नारिकेलं च नैवेद्यं फाल्गुने परिकीर्तितम् ।**
**एवं द्वादशनैवेद्यैर्मासे चक्रमतोऽर्चयेत् ।।**[11]

एवं द्वादशमासेषु नैवेद्यानि देवीप्रीत्यै समर्पयेत् ।

श्रीमङ्गल-वैष्णवी-माया-कालरात्री-दुरत्यया-महामाया-मातङ्गी-काली-कमल-वासिनी-शिवसहस्र- चरण-सर्वमङ्गलरूपिणीति नैक नामान्तरैः मधूकवृक्षं पूजयेत्। तदनन्तरं मधूकवृक्षे शोभायमानां देवेश्वरी महेश्वरीं सकलकामसमृद्ध्यर्थं, व्रतपूर्णत्वसिद्ध्यर्थश्च एवम् आराधयेत् -

**नमः पुष्करनेत्रायै जगद्धात्र्यै नमोऽस्तुते।**
**माहेश्वर्यै महादेव्यै महामङ्गलमूर्तये ।।**
**परमा पापहन्त्री च परमार्गप्रदायिनी।**
**परमेश्वरी प्रजोत्पत्तिः परब्रह्म स्वरूपिणी ।।**
**मददात्री मदोन्मत्ता मानगम्या महोत्रता।**
**मनस्विनी मुनिध्येया मार्ताण्डसहचारिणी ।।**
**जयलोकेश्वरि प्राज्ञे प्रलयाम्बुदसन्निभे ।**
**महामोहविनाशार्थ पूजिताऽसि सुरासुरैः ।।**
**यमलोका भवकर्जी यमपूज्या यमाग्रजा।**
**यमनिग्रहरूपा च यजनीये नमो नमः ।।**
**समस्वभावा सर्वेशी सर्वसङ्गविवर्जिता।**
**सङ्गनाशकरी काम्यरूपा कारुण्यविग्रहा ।।**
**कङ्कालक्रूरकामाक्षी मीनाक्षीमर्मभेदिनी।**
**माधुर्यरूपशीला च मधुरस्वरपूजिता ।।**
**महामन्त्रवती मन्त्रगम्या मन्त्रप्रियङ्करी।**
**मनुष्यमानसगमा मन्मधारिप्रियङ्करी ।।**
**अश्वत्थवटनिम्बाम्र कपित्थ बदरीगते।**
**वनसार्ककरीरादि क्षीरवृक्षस्वरूपिणि ।।**
**दुग्धवल्ली निवासार्ह दयनीये दयाधिके।**
**दाक्षिण्य करुणारूपे जय सर्वज्ञवल्लभे ।।**[12]

एवं मधूकवृक्षपूजानन्तरं देव्याः स्तवनेन नरः सम्पूर्णव्रतपुण्य-फलमवाप्नोति ।

सर्वदा स्तोत्रमिदं देव्याः येन पठ्यते सः आधिव्याधिविनिर्मुक्तो भवति। अनेन स्तोत्र-पठनेन जनाः धर्मार्थकाममोक्षान् यथेष्टमाप्नुवन्ति। ब्राह्मणो वेदसम्पन्नो भवति। क्षत्रियो विजयी भवति।

**उपसंहारः (Conclusion) -** निष्कर्षरूपेण वक्तुं शक्यते यत् श्रीदेवीभागवतं केवलं भक्तिग्रन्थः नास्ति, अपितु अत्र पूजायाः वैज्ञानिकी आचारसंहिता अपि प्रदर्शिता। नवरात्रिव्रतं शारीरिकशुद्धिं (उपवासेन), मानसिकशुद्धिं (पारायणेन), आध्यात्मिकशुद्धिं (होमेन) च ददाति। कुमारीपूजनेन समाजस्य कन्यासु श्रद्धाभावः जागर्ति। यः मानवः श्रद्धया एतं विधिं पालयति, सः आध्यात्मिकपरमसुखं प्राप्य अन्ते मोक्षं लभते ।

**सहायकग्रन्थाः (Primary Sources)**


१) **श्रीमद्देवीभागवतपुराणम् (सटीकम्) । मूललेखकः :** महर्षिः वेदव्यासः। **विशिष्टस्कन्धाः :** तृतीयस्कन्धः (विशेषतः अध्याय १२, १३, २५, २६, २७) तथा नवमस्कन्धः (अध्याय २६)।
**विषयः :** देवीयज्ञविधानम्, कुमारीपूजा, नवरात्रिविधिः, तथा च मासानुगुणं नैवेद्यम्।

२) **देवीभागवतपुराणम् (हिन्दी-संस्कृतव्याख्यासहितम्) । व्याख्याकारः :** पण्डित श्रीरामशर्मा आचार्यः। **प्रकाशकः:** युग निर्माण योजना, गायत्री तपोभूमि, मथुरा।

३) **श्रीमद्देवीभागवतपुराणम् (संस्कृत-हिन्दी व्याख्या) । सम्पादकः/व्याख्याकारः:** पण्डित रामतेज पाण्डेयः। **प्रकाशकः:** चौखम्बा विद्याभवन, वाराणसी।

४) **देवीमाहात्म्यम् (दुर्गासप्तशती) । ग्रन्थः:** मार्कण्डेयपुराणान्तर्गतम्। **प्रकाशकः:** गीता प्रेस, गोरखपुर।

५) **पुराणविमर्शः । लेखकः:** आचार्य बलदेव उपाध्यायः। **प्रकाशकः:** चौखम्बा विद्याभवन, वाराणसी।

६) **शक्तिसङ्गतन्त्रम् (Sundari Khanda)। विषयः:** दशमहाविद्यानां पूजाक्रमः। **प्रकाशकः:** गायकवाड़ ओरिएण्टल सीरीज, बडौदा।


**पाद टिप्पणी: -**

1 दे.भा.३.१२.३-८७, ३.१३.४-५९

2 दे. भा. ३/१३/३९-४४

3 दे.भा.३.२५.१-४६

4 श्रीमद्देवीभागवतपुराणम् तृतीयस्कन्धः, षड्विंशतितमेऽध्याये - ३.२६.११

5 देवीभागवतम् – ३/२६/३२-३४

6 श्रीमद्देवीभागवतपुराणम्, तृतीयः स्कन्धः – २६ ४०, ४१, ४२, ४३

7 श्रीमद्देवीभागवतपुराणम् - तृतीयः स्कन्धः – २७/४-८

8 श्रीमद्देवीभागवतपुराणस्य तृतीयस्कन्धस्य सप्तविंशतितमेऽध्याये - -७-१५

9 दे.भा. ३.२६.१-६२, ३.२७.१-५७

10 श्रीमद्देवीभागवतपुराणम् – 9/26/48-63

11 श्रीमद्देवीभागवतपुराणम् – 9/26/79-83

12 श्रीमद्देवीभागवतपुराणम् – 9/26/92-100